संस्कृतवार्ता:

दिनाङ्क :-31.01.2025 प्रात: - 06:55

अथ वार्ताः

## संसद्सत्रम्

अद्य प्रातः राष्ट्रपतेः द्रौपदीमुर्मु इत्येतस्याः संसदः उभयोः सदनयोः सम्बोधनेन साकम् संसदः अर्थसङ्कल्पनासत्रं समारप्स्यते। राष्ट्रपतेः अभिभाषणानन्तरं केन्द्रीयवित्तमन्त्री निर्मला – सीतारामन् इत्येषा लोकसभा- राज्यसभयोः संक्षिप्ते सत्रे आर्थिक- सर्वेक्षणं प्रस्तोष्यति। अस्माकं वार्ताहरः सूचितवान् यत् आर्थिकसर्वेक्षणस्य प्रस्तुतिकरणं संसदि अर्थसङ्कल्पना-सत्रस्य आधिकारिकारम्भं द्योतयति इति। अद्य आरभ्य समारप्स्यमानस्य अर्थ-सङ्कल्पनासत्रस्य प्रथमो भाग: फरवरीमासस्य त्रयोदश दिनाङ्कं यावत् प्रचलिष्यति अपि च द्वितीय: भाग: मार्चमासस्य दशदिनाङ्कत: अप्रैलमासस्य चतुर्थ-दिनाङ्कपर्यन्तं प्रचलिष्यति।

## महाकुम्भः – न्यायिकायोगः

महाकुम्भसम्बद्धाः घटनाः अन्वीक्ष्य उत्तरप्रदेश-प्रशासन- द्वारा निर्मितः न्यायिकायोगः अद्य प्रयागराजनगरस्य सङ्गमघट्टस्य अवलोकनं करिष्यति। अयम् आयोगः घटनायाः कारणानि अन्वेषयिष्यति परिस्थितिनां च निरीक्षणं कृत्वा एकमासाभ्यान्तरे एव प्राप्त- प्रतिवेदनानि समर्पयिष्यति। त्रिसदस्यात्मकस्य अस्य निर्मितायोगस्य नेतृत्वम् इलाहाबाद- उच्च- न्यायालयस्य सेवानिवृतः न्यायाधीशः हर्षकुमारः करोति। ह्यः उत्तप्रदेशस्य मुख्यसचिवः मनोजकुमारसिंहः आरक्षिमहानिदेशकः प्रशान्तकुमारश्च महाकुम्भ-क्षेत्रे सङ्गमघट्टस्य भ्रमणं कृत्वा घटनास्थलस्य निरीक्षणं कृतवन्तौ।

## महाकुम्भ- जनपदाधिकारी

प्रयागराज-नगरस्य जनपदाधिकारी रवीन्द्र- कुमार-मन्दारः मार्गपरिवर्तनस्य कारणात् वाहन-प्रवेशस्य प्रतिबन्धस्य विषये सञ्चारमाध्यमानां वार्ताः निराकृतवान्। फेब्रुवरी मासस्य चतुर्थ दिनाङ्कपर्यन्तं प्रयागराज-नगरे वाहनानां प्रवेशः प्रतिबन्धितः भविष्यति इति सामाजिक-सञ्चार- माध्यमेषु तीव्रगत्या एक: सन्देश: प्रसृत: । एकस्मिन् दृश्याङ्कन-सन्देशे श्रीमन्दारः स्पष्टीकृतवान् यत् वसन्तपञ्चम्याः शुभावसरे अमृत-स्नानस्य कारणेन केवलं फेब्रुवरी-मासस्य द्वितीये दिनाङ्के, फेब्रुवरी-मासस्य तृतीय दिनाङ्के च प्रयागराज-नगरे वाहनप्रवेशः प्रतिबन्धितः भविष्यति इति।

## नवदिल्ली- पुस्तकमेलकम्

नवदिल्लयाः भारतमण्डपे श्वः आरभ्य नवदिल्ली- विश्व- पुस्तक- मेलकं समारप्स्यते। अस्मिन् वर्षे मेलकस्य शीर्षको विद्यते- वयं भारतस्य जनाः इति। नवदिवसात्मकस्य अस्य मेलकस्य उद्घाटनं राष्ट्रपतिना द्रौपदी मुर्मुइत्यनया विधास्यते। आकाशवाण्या सह वार्तालापं कुर्वन् राष्ट्रिय- पुस्तक- न्यासस्य निदेशकः युवराजमलिकः सूचितवान् यत् अस्मिन वर्षे मेलकस्य अस्य प्रमुखः रूसदेशो विद्यते तथा च पञ्चाशदधिकं देशाः भागं भजिष्यन्ति एतस्मिन् मेलके भूयोऽपि द्वि- सहस्रं यावत् प्रकाशकाः एकसहस्रं यावच्च वक्तारः सम्मिलिताः भविष्यन्ति।

## बैडमिण्टन प्रतिस्पर्धायाम्

बैडमिण्टन प्रतिस्पर्धायाम्, कीदाम्बी श्रीकान्तः शङ्कर- सुब्रह्मण्यम इत्येषः च बैंकॉकनगरे थाइलैण्ड- मास्टर्स- टूर्नामेण्ट- इत्येतस्याः प्रतियोगितायाः पुरूषैकलस्पर्धायाः प्रागुपान्यचक्रे प्रविष्टवन्तौ।

## क्रिकेटिति

आई.सी.सी. अण्डर-19 इत्येतस्यां महिलानां विंशतिप्रति विंशति – विश्व- चषकप्रतिस्पर्धायाम् अद्य मलेशियायाः कुआलालाम्पुरे उपनिर्णायकचक्रे भारतम् इंग्लैण्डदलं सम्मुखीकरिष्यति । भारतीय- समयानुसारि क्रीडायाः अस्याः प्रसारणं मध्याह्ने द्वादशवादने भविष्यति।

## वैष्णवः-ए. आईइति

सूचनाप्रसारण- प्रौद्योगिकमन्त्री अश्विनी-वैष्णवः अवदत् यत् आगामिषु मासेषु भारतं ए०आई० इत्यस्य स्वकीयं मूलभूत-प्रतिरूपं निर्मास्यति। ह्यः नवदिल्ल्यां प्रसारमाध्यमै सह संलापयन् श्री-वैष्णवः अवदत् यत् भारतस्य मूलभूत-प्रतिरूपं विश्वस्य सर्वोत्तम-प्रतिमानैः सह स्पर्धां कर्तुं शक्नुयादिति।

इति वार्ताः